दधिमुखः, पुं, (दधिवत् शुभ्रं मुखं यस्य ।) वानरविशेषः । स सुग्रीवश्वशुरः तस्य मधुवनपालकश्च । इति रामायणम् ॥ (यथा, महाभारते । ३ । २८२ । ७ ।
"श्रीमान् दधिमुखो नाम हरिवृद्धोऽपि वीर्य्यवान् ॥"
नागविशेषः । यथा, महाभारते । १ । ३५ । ८ ।
"सुरामुखो दधिमुखस्तथा विमलपिण्डकः ॥"
अयन्तु दर्व्वीकराणां सर्पाणामन्यतमः । इति सुश्रुते कल्पस्थाने ४ अध्याये ॥)

दधिशोणः, पुं, वानरः । इति त्रिकाण्डशेषः ॥

दधिस(श)क्तवः, पुं, दध्युपसिक्ताः सक्तवः । करम्भः । इत्यमरः । २ । ९ । ४८ ॥ दइछातु इति भाषा ॥ नित्यबहुवचनान्तोऽयम् ॥ (यथा, महाभारते । १३ । १०४ । ९१ ।
"न पाणौ लवणं विद्वान् प्राश्नीयान्न च रात्रिषु । दधिसक्तून् न भुञ्जीत वृथामांसञ्च वर्जयेत् ॥")

दधिसारं, क्ली, (दध्नः सारम् ।) नवनीतम् । इति हेमचन्द्रः । ३ । ७२ ॥

दधिस्नेहः, पुं, (दध्नः स्नेहः ।) दधिसरः । तत्पर्य्यायः । सरः २ दध्युत्तरगम् ३ कट्वरम् ४ । इति रत्नमाला ॥

दधिस्वेदः, पुं, (दध्नः स्वेद इव ।) घोलम् । इति जटाधरः ॥

दधीचः, पुं, दधीचिमुनिः । इति शब्दभेदप्रकाशः ॥ (यथा, महाभारते । १ । १३८ । १२ ।
"दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥")

दधीचिः, पुं, मुनिविशेषः । स अथर्व्वमुनेरौरसात् कर्द्दमकन्यायां शान्तिनाम्न्यां जातः । वृत्रवधार्थं देवैरस्यास्थ्ना वज्रं निर्म्मितम् । इति श्रीभागवतम् ॥ यथा,—
"ऋतेऽस्थिभ्यो दधीचस्य निहन्तुं त्रिदशद्विषः ।
तस्मात् यत्नादृषिश्रेष्ठो याच्यतां सुरसत्तमाः ॥
दधीचेरस्थीनि देहीति तैर्व्वधिष्यथ दानवान् ।
तत् श्रुत्वा सहसा देवैर्याचितो मुनिभिस्तथा ॥
ददौ चास्थीनि देवेभ्यो दधीचिः सुमनास्तदा ।
प्राणायामं ततः कृत्वा देहं त्यक्त्वा सुभास्वरान् ॥
सर्व्वलोकान् चयान् प्राप्तो येभ्यो नावर्त्तनं पुनः ।
तस्यास्थिभिरथो शक्रः प्रहृष्टः सुमनास्तथा ॥
कारयामास दिव्यानि तानि प्रहरणान्युत ।
वज्रासिशूलचक्रञ्च परिघा विविधा गदाः ॥
विश्वकर्म्मा सुराणान्तु परिघाद्यायुधानि च ॥"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥

दधीच्यस्थि, क्ली, (दधीचेरस्थि ।) वज्रम् । हीरकम् । इति त्रिकाण्डशेषः ॥

दधृक् [ष्] त्रि, (धृष्णोतीति । धृष प्रागल्भ्ये + "ऋत्विग्दधृगिति ।" ३ । २ । ५९ । इति क्विन् द्वित्वादिकञ्च निपात्यते ।) धृष्टः । इति त्रिकाण्डशेषः ॥ (धर्षकः । यथा, ऋग्वेदे । ५।६६।३ ।
"रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥")

दध्रः, पुं, (दधते जीवेभ्यः पापपुण्यफलापलं ददातीति । दध दाने + बाहुलकात् रः ।) यमः । इति शब्दरत्नावली ॥

दध्याकरः, पुं, (दध्नः आकर इव ।) दधिसमुद्रः । इति शब्दार्थकल्पतरुः ॥

दध्यानी, स्त्री, (दधिवत् शुभ्रतां आनयतीति । आ + नी + क्विप् ।) सुदर्शना । इति रत्नमाला ॥ सुदर्शनगुलञ्च इति भाषा । दएखए इति केचित् । पुराति इति केचित् । मदनमस्त इति हिन्दी भाषा ॥

दध्युत्तरं, क्ली, (दध्नः उत्तरं शेषजातम् ।) दधिस्नेहः । इति शब्दचन्द्रिका ॥ (यथा, हरिवंशे । ७८ । ६२ ।
"पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च ।
यथाकामं प्रदानाय भोज्यादिश्रयणाय च ॥")

दध्युत्तरगं, क्ली, (दध्न उत्तरं चरमावस्थां गच्छतीति । गम + डः ।) दधिस्नेहः । इति रत्नमाला ॥

दध्युदः, पुं, (दधिवदुदकं यस्य । उत्तरपदस्य च इत्युदकस्योदादेशः ।) दधिसमुद्रः । इति जटाधरः ॥

दनुः, स्त्री, कश्यपपत्नी । सा दक्षकन्या दानवमाता च । इति त्रिकाण्डशेषः ॥ (यथा, मत्स्यपुराणे ६ अध्याये ।
"कश्यपस्य प्रवक्ष्यामि पत्नीभ्यः पुत्त्रपौत्त्रकान् ।
अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ॥
सुरभिर्विनता तद्वत् ताम्रा क्रोधवशा इरा ।
कद्रूर्विश्वा मुनिस्तद्वत्तासां पुत्त्रान्निबोधत ॥"
"दनुः पुत्त्रशतं लेभे कश्यपाद् बलदर्पितम् ।
विप्रचित्तिः प्रधानोऽभूत् येषां मध्ये महाबलः ॥
द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिरोधरः ।
अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥
मरीचिर्मेघवांश्चैव इरा गर्भशिरास्तथा ।
विद्रावणश्च केतुश्च केतुवीर्य्यः शतह्रदः ॥
इन्द्रजित् सत्यजिच्चैव वज्रनाभस्तथैव च ।
एकचक्रो महाबाहुर्व्वज्राचस्तारकस्तथा ॥
असिलोमा पुलोमा च बिन्दुर्बाणो महासुरः ।
स्वर्भानुर्वृषपर्व्वा च एवमाद्या दनोः सुताः ॥"
दानवविशेषे, पुं । यथा, गोः रामायणे कबन्धस्योक्तौ । ३ । ७५ । २४ ।
"श्रियो मां मध्यमं पुत्त्रं दनुं नाम्ना च दानवम् ॥")

दनुजः, पुं, (दनोर्जायते इति । जन + डः ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (यथा, भागवते । ६ । ६ । ४० ।
"तत्रैव विभूतयो दितिदनुजादयश्चापि ॥")

दनुजद्विट्, [ष्] पुं, (दनुजानां असुराणां द्विट् शत्रुः । यद्वा, दनुजान् द्वेष्टीति । द्विष् + क्विप् ।) देवः । इति शब्दरत्नावली ॥ (दानवशत्रौ, त्रि । यथा, प्रयोगरत्नमालायां शब्दप्रकरणस्यादौ ।
"नमो नन्दकुमार यराय दनुजद्विषे ॥")

दनुसूनुः, पुं, (दनोः सूनुः पुत्त्रः ।) असुरः । इति जटाधरः ॥

दन्तः, पुं, (दम + "हसिमृग्रिणिति ।" उणां । ३ । ८६ । इति तन् ।) पर्व्वतकटकः । कुञ्जः । इति मेदिनी । ते, २३ ॥ शैलशृङ्गम् । इति त्रिकाण्डशेषः ॥ चर्व्वणसाधनास्थि । दाँत इति भाषा । गर्भस्थस्य षष्ठे मासि शुक्लदन्तपङ्क्तिर्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । रदनः २ दशनः ३ रदः ४ । इत्यमरः । २।६।९१ ॥ द्विजः ५ खरुः ६ । इति शब्दरत्नावली ॥ * ॥ तत्शुक्लकारकौषधं यथा,—

हरिरुवाच ।
"हरितालं यवक्षारं पत्राङ्गं रक्तचन्दनम् ।
जाती हिङ्गुलकं लाक्षा पक्वतैलेन पेषयेत् ॥
हरीतकीकषायेण घृष्ट्वा दन्तान् प्रलेपयेत् ।
दन्ताः सुशोणिताः पुंसः श्वेता रुद्र ! न संशयः ॥"
इति गारुडे १८३ अध्यायः ॥ * ॥
"शङ्खमामलकीपत्रं धातक्याः कुसुमानि च ।
पिष्ट्वा तत् पयसा सार्द्धं सप्ताहं धारयेन्मुखे ॥
स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः ॥"
इति तत्रैव १८५ अध्यायः ॥ * ॥
"मूलं गोक्षुरकस्यैव चर्व्वित्वा नीललोहित ! ।
दन्तकीटव्यथां नश्येद्वासुरविमर्द्दन ! ॥"
इति च गारुडे १९३ अध्यायः ॥ * ॥
सदन्तजातस्य शुभाशुभफलं यथा,—
अथ जातभद्रादि । तत्र दन्तजन्मचिन्ता ।
"जातः सदन्तः पितृमातृहन्ता
तातं विहन्यात् प्रथमे तु मासि ।
भ्रमीं द्वितीये सहजं तृतीये
मासि चतुर्थे शुभकारकः स्यात् ॥
मिष्टान्नभोजी सुभगः सुताख्ये
षष्ठे सुखी पण्डितकल्पबुद्धिः ।
ततोऽधिकः स्यात् बलवान् तुरङ्गाख्ये
मासेऽष्टमे वित्तसुखैर्विहीनः ॥
सुरप्रतापी नवमे ज्वरञ्च दशमे तथा ।
एकादशे द्वादशे च सुखी च सुभगो भवेत् ॥
अष्टौ पुत्तलिकान् कृत्वा सुगन्धैर्गन्धकैस्तथा ।
स्रोतःसु संक्रमे चापि स्नापयेत् शुक्लपुष्पकैः ॥
स्नानं संक्रमणस्याधः शम्भोर्द्दर्शनमन्ततः ।
होमं विप्रार्चनञ्चैवमशुभे दन्तदर्शने ॥"
इति ज्योतिस्तत्त्वम् ॥
रतिक्रीड़ायां तस्याघातस्थानानि यथा,—'
"स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे ।
दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः ॥"
इति कामशास्त्रम् ॥ * ॥
अथ दन्तरोगाणां निदानादि यथा,—
"शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥
दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् ।
शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥१॥
दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ २॥
स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥ ३ ॥
श्वयथुर्द्दन्तमूलेषु रुजावान् कफरक्तजः ।
लालास्रावी स विज्ञेयः शौषिरो नाम नामतः ॥
कण्डूमान् शैषिरो गदः । इति च पाठः ॥ ४ ॥